Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

संस्कृत-

साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३८
फेब्रुआरी - २०२६

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad Unaccountable L1 on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

चिन्तनम्

सतीशः गज्जर्

स्वास्थ्यस्य पोस्टमोर्टम

मनुष्यजीवनं जटिलम् अस्ति। तत्रापि यदा रोगाः प्रहरन्ति तदा तत् विशेषतः विवशम् इव भवति। भवतु नाम, वयं रोगान् मूलतः अपाकर्तुं न शक्नुयाम, तथापि काञ्चित् जीवनशैलीं रचयितुं निश्चयेन शक्नुमः । अत्र प्रस्तुतानि वाक्यानि एतं विचारं विस्तारयितुं शक्नुयुः।

– यः मनुष्यः नित्यं चलति, सः लक्ष्यं लभते न वा इति न जानीमः, किन्तु सः स्वास्थ्यम् अवश्यं लभते।

– शरीरं भवतः अस्ति। तस्य भाषां भवान् एव ज्ञातुं शक्नोति, वैद्यः न।

– सफलं दाम्पत्यम् अर्थात् किम् ? दम्पत्योः उदरं सदा मर्यादायाः उल्लङ्घनं न करोति तत्।

– गृहे कृताः सर्वे संयमाः भोजनालये विलीयन्ते।

– कोऽपि पशुः अत्याहारेण मृतः इति न श्रूयते।

– केचन रोगाः स्वाभिमानिनः भवन्ति। ते विना आमन्त्रणं देहं न प्रविशन्ति।

– यदा पत्नी साग्रहं मिष्टान्नं परिवेषयति, तदा न जानाति यत् सा पत्युः स्थालिकायां मधुप्रमेहं स्थापयति।

– मनुष्यस्य स्वास्थ्यस्य निर्णयः प्रायः पाकशालायां भवति।

– हृदयरोगः निःशुल्कं नैव लभ्यते। मनुष्यः तं प्राप्तुं बहूनि वर्षाणि सज्जतां करोति।

– रुग्णता अलसेन पुरुषेण सह विवाहं कर्तुं सदैव तत्परा भवति।

– भवान् श्रमाय स्थानं ददातु, अन्यथा रोगः तत्र वासं करिष्यति।

– शरीरस्य मध्ये लम्बमाने उदरे मनुष्यस्य दिनचरी अपि लिखिता भवति। यादृशी दिनचरी, तादृशम् उदरम्।

– यः भोजनपीठे संयमी, सः पीठाधिपतिः एव। तदर्थं संन्यासः अनिवार्यः नास्ति।

– मनुष्यः सङ्ग्रहवृत्तिं त्यक्तुं न शक्नोति। सः वित्तकोषे धनस्य सङ्ग्रहं करोति, शरीरे च रोगाणां सङ्ग्रहं करोति।

– उदरं यदा अपमानं सोढुं न शक्नोति, तदा बहिः आगत्य विद्रोहं प्रदर्शयति।

– बुभुक्षितः मनुष्यः एव स्वादस्य सौन्दर्यम् अवगन्तुं शक्नोति।

वृद्धायाः साहाय्यम्

उदयः श्रीपुरग्रामात् रामपुरं प्रति प्रस्थितः । रामपुरप्राप्तिसमये महान् विलम्बः जातः । यतः मार्गः असमीचीनः आसीत् । उदयः रामपुरं पूर्वं न दृष्टवान् आसीत् । अतः 'अस्यां रात्रौ कुत्र वसामि, भोजनादिकं कथम्' इति चिन्ता उत्पन्ना तस्मिन् । एवं चिन्तयन् सः कस्यचित् गृहस्य द्वारं ताडितवान् ।

क्षणानन्तरं काचित् वृद्धा द्वारम् उद्घाटितवती । तां दृष्ट्वा उदयः उक्तवान् – ''मातः, अहं श्रीपुरवासी । मम नाम उदयः । उद्योगम् अन्विष्यन् अत्र आगतः । महती बुभुक्षा बाधते माम्'' इति ।

वृद्धा उदयं क्षणकालं दृष्ट्वा उक्तवती ''अन्तः आगच्छतु'' इति । सा तस्मै भोजनमपि दत्तवती । भोजनं कृत्वा उदयेन उक्तम् – ''मातः रात्रौ अहम् अत्रैव निद्रामि । प्रातः एव इतः प्रस्थास्ये'' इति । ततः गृहं सर्वं पश्यन् सः तां वृद्धां पृष्टवान् – ''गृहे अन्यः कोऽपि न दृश्यते किल'' इति ।

''मम पुत्रः स्नुषा च पार्श्वग्रामं गतौ स्तः । श्वः आगमिष्यतः तौ'' इति उक्तवती वृद्धा ।

शयनात् पूर्वम् उदयः स्वस्य कथां वृद्धाम् उक्तवान् – ''मम मातापितरौ स्तः । पिता दुर्व्यसनी सञ्जातः इति कारणात् अस्मदीयं क्षेत्रं विक्रीतम् अभवत् । अतः अहम् उद्योगम् अन्विष्यन् अत्र आगतः'' इति । ततः सः द्वारसमीपे एव शय्यां प्रसार्य सुप्तवान् । किन्तु तेन शयनसमनन्तरम् एव निद्रा न प्राप्ता । सुवर्णस्य मेखलां कपाटिकायां संस्थाप्य कीलयित्वा कुञ्चिकाम् उपधानस्य अधः स्थापयन्ती वृद्धा दृष्टा तेन ।

सर्वं दृष्टवतः उदयस्य मनसि विचारः आगतः 'एतां मेखलां चोरयामि चेत् कानिचन दिनानि मम उदरपूरणसमस्या न भवेत्' इति । अनन्तरक्षणे तस्य मनः अवदत् 'एतादृशः दुष्टः विचारः न करणीयः । या वृद्धा बुभुक्षिताय मह्यं भोजनादिकं दत्त्वा शयनार्थं स्थलमपि दत्तवती, तस्याः विषये एवं चिन्तनमेव असाधु' इति । एवं तस्य मनसि अनेके विकल्पाः आगताः । ततः 'एतादृशः सुसमयः सर्वदा न प्राप्यते' इति कश्चन निर्णयः कृतः तेन ।

उदयः किञ्चित्समयपर्यन्तं निद्रायाः अभिनयं कृतवान् । ततः निश्शब्दम् उत्थितवान् । तावति काले तेन कयोश्चित् बहिः वार्तालापः श्रुतः । वातायनसमीपम् आगत्य उदयः स्थितवान् । बहिः कश्चित् अन्यं वदति स्म – ''तिष्ठतु । वृद्धायाः समीपे न केवलं मेखला अस्ति, अपि तु अनेकानि आभरणानि अपि सन्ति । यदि चौर्यसमये सा कोलाहलं कुर्यात् तर्हि वस्त्रेण तस्याः मुखम् आच्छाद्य समग्रं धनं लुण्ठयावः'' इति ।

एतत् श्रुतवतः उदयस्य मनसि लज्जा उत्पन्ना । यतः सोऽपि तथैव कर्तुम् उद्युक्तः आसीत् । सः शनैः वृद्धायाः समीपम् आगत्य वृद्धाम् उत्थाप्य चोरयोः वार्तालापं सर्वम् उक्त्वा अग्रे किं करणीयम् इत्यपि उक्तवान् ।

ततः उदयः द्वारम् उद्घाट्य वृद्धया सह बहिः आगतः। चोरौ एतत् दृष्ट्वा सन्तुष्टौ। 'द्वारं तु उद्घाटितम् अस्ति, गृहे अन्यः कोऽपि नास्ति' इति चिन्तयन्तौ तौ यदा गृहं प्रविष्टौ तदा बहिः स्थितः उदयः द्वारं पिधाय कीलितवान्। इदानीं चोरौ बन्धितौ जातौ।

वृद्धा उच्चैः – 'चोरः चोरः' इति आक्रोशनं कृतवती। तदा पार्श्वगृहस्थाः धावन्तः आगत्य द्वारम् उद्घाट्य चोरौ गृहीतवन्तः, तौ ग्रामाधिकारिणः समीपं नीतवन्तः च। तदा उदयः वृद्धायाः पादौ गृहीत्वा "मातः ! मामपि ग्रामाधिकारिणः अधीनं करोतु। यतः एतौ चोरौ यदि न आगच्छेताम् तर्हि अहम् एव एवं कर्तुम् उद्युक्तः अभविष्यम्" इति उक्तवान्।

वृद्धा तं प्रीत्या पश्यन्ती उक्तवती – "वत्स ! असहायां मां दृष्टवतः भवतः मनसि चौर्यचिन्तनम् उत्पन्नम्। किन्तु एतं विचारं माम् उक्त्वा भवान् निष्कलङ्कः अभवत्। तावदेव न, चोरौ गृहीत्वा मम आभरणानि रक्षितानि अपि भवता। अतः इदानीं भवान् मम पुत्रः इव। मम पुत्रस्य आगमनस्य अनन्तरं तेन सह भवानपि क्षेत्रकार्यं कुर्वन् अत्रैव अस्माभिः सह वसतु" इति। एतत् श्रुत्वा उदयः कृतज्ञतापूर्वकं वृद्धां नमस्कृतवान्।

प्रगतेः रहस्यम्

रामः पञ्चाशद्वर्षीयः कृषिकः। तदीये ग्रामे, अन्येषु ग्रामेषु च वसन्तः जनाः वदन्ति स्म यत् रामः महाबुद्धिमान् विवेकी च। वस्तुतः सः तस्मिन् ग्रामे जातः न। विंशतेः वर्षेभ्यः पूर्वं सः रिक्तहस्तः सन् तं ग्रामम् आगतवान् आसीत्। श्रमेण कृषिं कुर्वन् विशालां भूमिं क्रीत्वा प्रभूतां सम्पत्तिम् अपि सम्पादितवान् आसीत् सः।

कदाचित् सः ग्रामात् बहिः कासारतीरे उपविश्य कासारे सञ्चरतां बलाकादीनां सञ्चारं पश्यन् आसीत्। तदा उभौ युवकौ तस्य पार्श्वे आगत्य उपविष्टवन्तौ।

परिचयानन्तरं किञ्चित्कालं सामान्यं सम्भाषणं तेषां प्रवृत्तम्। अन्ते कश्चन युवकः रामवर्यम् अपृच्छत् – "श्रीमन्। अहं किमपि प्रष्टुम् इच्छामि" इति।

रामवर्यः हसन् अवदत् – "कामं पृच्छतु तावत्। एतस्मिन् वयसि प्रष्टव्याः अंशाः बहवः भवन्ति एव" इति।

"आर्य ! भवान् एतं ग्रामं रिक्तहस्ततया आगतः इति श्रूयते। इदानीं तु भवान् ग्रामस्य आढ्येषु अन्यतमः। एषा सम्पत्तिः कथं सम्पादिता भवता ? भवतः यशस्वितायाः रहस्यं किम् ?" इति कुतूहलेन अपृच्छत् सः युवकः।

रामवर्यः तस्य स्कन्धे प्रीत्या हस्तं संस्थाप्य अवदत् – "वत्स ! परिश्रमशीलता, निष्कपटता, कौशलं, सहिष्णुता इत्यादयः गुणाः एव मम प्रगतेः कारणम्। सम्पत्तिः सम्पादनीया चेत् एते गुणाः अवश्यं भवेयुः। एतेभ्यः ऋते अन्यः कोऽपि सरलः मार्गः नास्ति प्रगत्यै। एतत् एव मम यशस्वितायाः रहस्यम्" इति।

अभिज्ञानशाकुन्तलम् (ग्रन्थपरिचयः)

व्योम शाहः

(अनुवर्तते...)

कविकुलगुरुरित्युपाधिना विभूषितेन कालिदासेन विरचितेऽभिज्ञानशाकुन्तलाभिख्ये नाटके एतावताऽस्माभिः दृष्टं यत् मृगयार्थं मृगम् अनुगतः दुष्यन्तः वैखानसेन कण्वशिष्येण बोधितः। तस्यानुरोधं स्वीकृत्य सः पुण्याश्रमं गतः। तत्र प्रच्छन्नस्थेन तेन पूर्वं प्रियंवदानसूयाशकुन्तलानां परस्परं संलापः भ्रमरबाधा च निरवारिता। ततः तासाम् आतिथ्यं स्वीकृतं मिथश्च परिचयः जातः। दुष्यन्तस्य शकुन्तलायै अनुरागः आविर्भूतः। द्वितीयाङ्के तस्यानुरक्तस्थितिमेव पोषयति। प्रान्ते आश्रमे आपदं निवारयितुं स तपस्विजनानुरोधेन निर्गच्छति।

तृतीयाङ्कस्य प्रवेशकः। आगतमात्रेण दुष्यन्तेन सर्वाः आपदः निवारिताः। आतपवशाद् अस्वस्था शकुन्तला प्रियंवदया उपचर्यते। प्रवेशकानन्तरं शकुन्तलायाः स्वास्थ्यार्थं शोकातुरः दुष्यन्तः तत्र वेतसलतामण्डपे प्रविशति यत्र सा सखीभिः उपचर्यमाणा तिष्ठति। प्रच्छन्नः सन् दुष्यन्तः तासां संवादं शृणोति तेन च अनुमिनोति यत् शकुन्तलाऽपि अनुरागेण संतप्ता। शकुन्तला अपि तथैव आत्मनः भावान् सख्योः पुरतः प्रकटीकुरुते। तस्याः अनुरागः युक्तः इति कथयित्वा ते ताम् अनुकूलयतः। शकुन्तला दुष्यन्तस्य अनुकम्पनीया भवितुकामा इति दृष्ट्वा ते तस्याः मनोरथं सम्पादयितुं तर्कयन्ति। एतदाकर्ण्य राजाऽपि स्वीयां तादृशीमेव अवस्थां चिन्तयति। ताः मदनलेखं लेखितुं चिन्तयन्ति। शकुन्तला लिखति –

तव न जाने हृदयं मम पुनः मदनः दिवा च रात्रिं च।
निष्कृप ! तापयति बलीयः तव अभिमुखमनोरथायाः अङ्गानि।।

एतत् श्रुत्वा राजा सहसा उपसृत्य प्रत्यवदत् –

"तपति तनुगात्रि ! मदनस्त्वामनिशं मां पुनर्दहत्येव।
ग्लपयति यथा शशाङ्कं न तथा हि कुमुद्वतीं दिवसः ॥३/२०॥"

सख्यौ सहर्षम् उत्थिते। उत्थातुकामा शकुन्तला दुष्यन्तेन निवारिता। प्रियंवदा प्रियसख्याः शकुन्तलायाः प्रणयं दुष्यन्तस्य पुरतः प्रकटयति। राजा अनुगृहीतः। बन्धुजनशोचनीया सखी न भवेदिति चिन्तां निवारयितुं राजा पुनः अभिधत्ते –

"परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य नः।
समुद्ररसना चोर्वी सखी च युवयोरियम् ॥३/२३॥"

श्रुत्वा सर्वाः हृष्टाः। शकुन्तलाऽपि शनैः शनैः स्वस्थीभवति। किमपि कारणं दर्शयित्वा प्रियंवदाऽनसूये ततः निर्गते। ततः द्वयोः प्रणयसंवादः क्रीडा च भवति। इहैव राजा तया सह गान्धर्वं विवाहम् आचरति। किञ्चित् कालानन्तरं शान्त्युदकसहितं गौतमी प्रविष्टा। शकुन्तलया राजा विटपान्तरं प्रेषितः। गौतमी शकुन्तलां तेन शान्त्युदकेन अभ्युक्षति। रजनी जाता इति कृत्वा सा ताम् उटजमेव नयति। राजानं सङ्केतयितुं सा "लतागृहक! सन्तापहारक! आमन्त्रयामि त्वां पुनरपि परिभोगार्थम्।" इत्युदित्वा निर्गच्छति। राजा कञ्चित् कालं लतामण्डपे उपविष्टः। यावता सः शकुन्तलया सह आत्मनः कालं स्मरति स्म तावता एव नेपथ्यवचनाद् ज्ञातं यद् राक्षसाः पुनः सायंतन-सवनकर्मणि तपस्विनः बाधन्ते। राजा त्वरया निर्गच्छति। अनेन च तृतीयाङ्कस्य समाप्तिः भवति।

(क्रमशः...)

मासवार्त्ता:

सम्पन्न: षोडश: पदवीदानसमारम्भ:



एकलव्य-संस्कृत-एकेडेमीसंस्थानस्य षोडश: पदवीदानसमारम्भ: जनवरीमासस्य ३१ दिनाङ्के सम्पन्न:। समारम्भेऽस्मिन् 'डिप्लोमा-इन-संस्कृतटिचिंग' इति अभ्यासक्रमस्य प्रशिक्षितेभ्य: श्रीमती वैदेही अध्यारूमहोदयाया: (अनुवादकर्त्री, श्रीमद्भागवतमहापुराणम्, श्रीधरीटीका गुजराती) करकमालाभ्यां पदवीप्रदानम् अभवत् । अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविविद्यालयेन सह संलग्न: वर्तते । कार्यक्रमेऽस्मिन् डॉ. भाविन् पाठक: (सहायकाध्यापक:) विशेषोपस्थितिं प्रायच्छत् । प्रसङ्गेऽस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थाने आयोजितेषु विविधेषु अभ्यासक्रमेषु संस्कृतस्य अध्ययनं कृतवद्भ्य: छात्रेभ्य: अपि प्रमाणपत्रप्रदानम् अभवत्। प्रमाणपत्रं प्राप्य सर्वे छात्रा: आनन्दिता: आसन्।

कृपया हसन्तु

शिक्षकः - (नमनं प्रति) भोः नमन ! त्वं सर्वदा दूरवाणीं पश्यसि, पुस्तकं कदा पठसि ?

नमनः - अहो ! दूरवाणी अपि पुस्तकमेव ।

शिक्षकः - कथम् ?

नमनः - दूरवाण्याम् अपि अध्यायाः (apps) सन्ति ।

★ ★ ★ ★ ★

गुरुः - (छात्रान् उद्दिश्य) भोः छात्राः ! सङ्गणकयन्त्रं किं करोति ?

रमणः - गुरुदेव ! सङ्गणकयन्त्रं सर्वं स्मरति ।

गुरुः - तर्हि मानवः किं करोति ?

रमणः - मानवः सङ्गणकस्य कूटसङ्ख्यां (password) विस्मरति ।

★ ★ ★ ★ ★

पिता - (पुत्रं प्रति) भोः पुत्र, वाणिज्यस्य मुख्यः नियमः कः ?

पुत्रः - ग्राहकः एव राजा ।

पिता - शोभनम् । राजा किम् इच्छति ?

पुत्रः - न्यूनेन मूल्येन, अधिकं लाभम् ।

पिता - वणिक् किम् इच्छति ?

पुत्रः - ततः विपरीतम् ।

सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

श्लाघ्या महतामुन्नतिरद्भुतमध्यवसतिं च धीराणाम् ।
कनकगिरिमनभिलङ्घ्यो रविरनिशमनुज्झितारम्भः ॥

तात्पर्यम् – धीराणां महापुरुषाणाम् औन्नत्यम् अद्भुतं श्लाघ्यं च भवति । सुमेरुपर्वतं लङ्घयितुम् असमर्थः अपि सूर्यः प्रतिदिनम् उदेति ।

श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
न हि प्रतीक्षते मृत्युः कृतमस्य न वा कृतम् ॥

तात्पर्यम् – श्वस्तनं कार्यम् अद्य एव करणीयम् । अपराह्णे यत् कर्तव्यं तत् पूवाह्णे समापनीयम् । एतेन कार्यं समापितम् उत न इति विचार्य मृत्युः न प्रतीक्षते ।

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता ॥

तात्पर्यम् – जीवने औन्नत्यं प्राप्तुं यः इच्छति तेन एते षड् दोषाः परित्यक्तव्याः – निद्रा, तन्द्रा (श्रान्तता), भीतिः, कोपः, आलस्यं, दीर्घसूत्रता (करणीयस्य कार्यस्य अग्रे सारणम्) च । एते दुगुर्णाः यदि स्युः तर्हि तादृशः निरन्तरं प्रयासं कर्तुं न अर्हति । परिश्रमेण विना फलप्राप्तिः नैव शक्या ।

ज्ञानसरित्

श्यामः पटेलः

त्रिशताब्दीवर्षीयः चक्रवातः – प्रायः वर्षाकाले चण्डवातेन वातावरणम् आकुलीभवति इति अस्माभिः सर्वैः अनुभूतमस्ति। किन्तु मित्राणि! एतादृशाः चक्रवाताः न केवलं भूमौ, अपि तु सूर्यमण्डलस्थेषु अन्येषु ग्रहेषु अपि भवन्ति।

यथा वयं जानीमः यत् सर्वे ग्रहाः स्वस्थाने तु भ्रमन्ति तथैव सूर्यं परितश्चापि भ्रमन्ति । अनेन भ्रमणद्वयेन प्रत्येकस्मिन् ग्रहे चक्रवातः उद्भवति । अस्माकं सूर्यमण्डले बृहत्तमः ग्रहः ''गुरुः'' अस्ति । सः स्वस्थाने अतिवेगेन भ्रमणं करोति। अस्माकं दशघण्टासु सः स्वस्थाने एकं चक्रं पूर्णं करोति। अर्थात् गुरुग्रहे दशघण्टात्मकम् अहोरात्रं भवति । अत एव तत्र सततं चक्रवाताः उद्भवन्ति । ख्रिस्ताब्दस्य १६६४तमे वर्षे टेलिस्कोप-यन्त्रस्य साहाय्येन वैज्ञानिकाः गुरुग्रहस्य उपरि एकं बृहत् रक्तवर्णीयं चिह्नं दृष्टवन्तः । तत् ''रेड-स्पोर्ट'' नाम्ना प्रसिद्धमस्ति । तस्य परिधिः ४०,००० किलोमीटरमितस्य अस्ति । सः एव चक्रवातः अस्ति । यस्मिन् 'हाईड्रोजन', 'मिथेन', 'फोस्फरस' इत्यादीनां मेघाः चक्राकारेण भ्रमन्ति। प्रतिषड्दिनं तस्य चक्रवातस्य दिक्परिवर्तनं भवति। एषः चक्रवातः प्रतिघण्टं ३६०किलोमीटरमितेन वेगेन दक्षिणतः वामं प्रति विपरितं भ्रमति। चक्रवातस्य एषा यात्रा त्रिशताब्दीतः अद्यावधि अपि जायमाना वर्तते।

शब्दमञ्जूषा

विष्टरः	आसन	a seat
पुलिनवती	नदी	a river
क्षितिः	पृथिवी	earth
ठक्कः	सौदागर	merchant
शौटीर्यम्	घमण्ड	pride
वल्गकः	कूदनेवाला	a jumper
विषक्तः	दृढ़तापूर्वक जमा हुआ	fixed firmly
विप्रश्निका	स्त्री ज्योतिषी	female fortune-teller
प्रतिश्रवणम्	ध्यान पूर्वक सुनना	listening
निष्ठुरः	रूखा	coarse
अर्यः	श्रेष्ठ	excellent
उत्पथः	कुमार्ग	wrong road
कृत्तिः	चमड़ा	hide
अविप्रवासः	एकत्र रहना	Being together

किं भवन्तः जानन्ति ?

१) चैत्रशुक्लप्रतिपदायां ६४ योगिनीनां पूजामेला कुत्र आयोज्यते ?

(क) लखनऊनगरे (ख) वाराणस्याम् (ग) चित्रकूटे (घ) देहरादूने

२) बुढ़वामङ्गलमेला कुत्र आयोज्यते ?

(क) इलाहबादे (ख) मालवायाम् (ग) छत्तीसगढे (घ) लखनऊनगरे

३) एतेषु किं पर्व 'खिचड़ी' इत्यपि कथ्यते ?

(क) मौनी-अमावस्या (ख) गणेशचतुर्थी (ग) मकरसङ्क्रान्ति (घ) चैत्रशुक्लप्रतिपदा

४) 'गुढ़ीपाडवा' पर्व कस्मिन् प्रदेशे प्रमुखतया आयोज्यते ?

(क) पञ्जाबे (ख) महाराष्ट्रे (ग) बिहारे (घ) मेघालये

५) 'छठ पूजा' पर्व कस्मिन् प्रदेशे प्रमुखतया आयोज्यते ?

(क) बिहारे (ख) बङ्गाले (ग) पञ्जाबे (घ) हरियाणायाम्

६) जनवरीमासस्य १४ दिनाङ्के किं पर्व आयोज्यते ?

(क) वैशाखी (ख) धुलेंडी (ग) मकरसङ्क्रान्ति (घ) वसन्तपञ्चमी

उत्तराणि – (१) ख (२) घ (३) ग (४) ख (५) क (६) ग

अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

Learn Offline

संस्कृतभाषाशिक्षणम्

First Level

Date : 11/2/2026 to 29/4/2026

Day : Mon-Wed-Fri

Time : 6.30 pm to 8.00 pm (IST)

Fees : 7000/-

Venue: Satva Vatika

Opp Randesan Metro Station Gandhinagar

Contact :

Dr. Mihir Upadhyay - (91) 098246 16237

Ila Joshi +(91) 063510 34630

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

Learn Online

छन्दःपरिचयः

Date : 3/3/2026 to 31/3/2026

Day : Tuesday-Thursday

Time : 7.00 am to 8.30 am (IST)

Fees : 2000/-

contact: Dr Mihir Upadhyay, 98246 16237

Learn Online/Offline

संस्कृतभाषाशिक्षणम्

First Level

Date : 9/2/2026 to 29/4/2026

Day : Mon-Wed-Fri

Time : 6.30 pm to 8:00 pm (IST)

Fees : 7000/-

Venue: Core House Ahmedabad

contact: Dr Mihir Upadhyay, 98246 16237

संस्कृत-

साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

वार्षिकं	रू	– 100
द्वैवार्षिकं	रू	– 175
त्रैवार्षिकं	रू	– 250
अङ्कमूल्यं	रू	– 10

प्रियवाचकाः

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

Published, Printed and Edited by Dr. Mihir Upadhyay
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
Fax: (91) 79 26563681
Mobile: (91) 98246 16237
e-mail: mihiresa@gmail.com
web: www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006